# संस्कृतसप्ताहोत्सवस्य

# विशिष्टसमारोहः

भाद्रपदकृष्णप्रतिपद्

16.08.2019



मुख्यातिथिः

डॉ. रमेश पोखरियाल 'निशङ्कः'

माननीयः मानवसंसाधनविकासमन्त्री,

भारतसर्वकारः, नवदेहली



विशिष्टातिथिः

श्री धोत्रे संजय शामराव

माननीयः मानवसंसाधनविकासराज्यमन्त्री

भारतसर्वकारः, नवदेहली

स्थलम्

राष्ट्रियसंग्रहालयः

जनपथः, नवदेहली - 110011

समयः

अपराह्णे 4.00 वादनतः

## राष्ट्रियसंस्कृतसंस्थानम्

( राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः

भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः )

नवदेहली

## संस्कृतं सेवमानाः

मानवसंसाधनविकासमन्त्रालयः

राष्ट्रियसंस्कृतसंस्थानम्

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्

संस्कृतविभागः, दिल्लीविश्वविद्यालयः

विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः

गोस्वामिगिरिधारीलालप्राच्यविद्याप्रतिष्ठानम्

दिल्लीसंस्कृत अकादमी

संस्कृतविभागः, राष्ट्रियशैक्षिक-अनुसंधान-प्रशिक्षणपरिषद्

देववाणी-परिषद्

अखिलभारतीयसंस्कृतप्रकाशकसंघः

अखिलभारतीयसंस्कृतपत्रकारसंघः

दिल्लीसंस्कृतशिक्षकसंघः

संस्कृतसंवर्धनप्रतिष्ठानम्

संस्कृतभारती

अखिलभारतीयसंस्कृतसाहित्यसम्मेलनम्

संस्कृतविभागः, जामिया मिल्लिया इस्लामिया-विश्वविद्यालयः

श्यामाप्रसादमुखर्जी-महाविद्यालयः

संस्कृतविभागः, एमिटि-विश्वविद्यालयः

सङ्घे शक्तिः कलौ युगे

अष्टादश-संस्थानां संयुक्ततत्त्वावधाने संस्कृतसप्ताहमहोत्सवस्य

# विशिष्ट-समारोहः

**भाद्रपदकृष्णप्रतिपद्**

**16 अगस्त, 2019 ( शुक्रवासरः )**

मुख्यातिथिः – **डॉ. रमेश पोखरियाल 'निशङ्कः'**
माननीयः मानवसंसाधनविकासमन्त्री
भारतसर्वकारः, नवदेहली

विशिष्टातिथिः – **श्री धोत्रे संजय शामराव**
माननीयः मानवसंसाधनविकासराज्यमन्त्री
भारतसर्वकारः, नवदेहली

**विशिष्टसंस्कृतसेवाव्रतिसम्मानभाजः**

1. डॉ. गोविन्द यलगलवाडी
2. श्री के.वि. संपत् कुमारः
3. डॉ. दन्तू मुरलीकृष्ण


स्थलम्
**राष्ट्रियसंग्रहालयः**
जनपथः, नवदेहली - 110011

समयः
**अपराह्ने 4.00 वादनतः**

**संस्कृतसप्ताहविशिष्टसमारोहः 2019**

# विशिष्टसंस्कृतसेवाव्रतिसम्मानः 2019

## डॉ. गोविन्द यलगलवाडी



अमेरिकादेशे वास्तव्योयं जनः संस्कृतभाषायाः आकृष्टः अयं प्रथमतः संस्कृतसंभाषणवर्गे 1995 तमे वर्षे भागं गृहीतवान्। ततः परं संस्कृतभारत्याः अमेरिकादेशस्य संयोजकरूपेण कार्यं विदधाति। संस्कृतभारतीसहयोगेन अमेरिकादेशस्य 40 प्रमुखनगरेषु संस्कृतप्रचारं विदधानो विद्यते। अस्य महोदयस्य प्रयत्नेन उत्तरामेरिकादेशे सहस्राधिकाः जनाः संस्कृतभाषायाः अध्ययने रताः सन्ति। नागरिकेषु संस्कृतस्य रुच्यभिवर्धनाय संस्कृतकेन्द्रम् इति कार्यक्रमं समायोज्य संस्कृतस्य प्रचारं कुर्वन् अस्ति। एवं बालानां कृते बालवर्गः इति कार्यक्रमम् समायोजयन् वर्तते। इदानीम् अस्मिन् केन्द्रे 1400 अधिकाः बालाः संस्कृतभाषाम् अधीयते। युवकानां कृते संस्कृतम् पाश्चात्यभाषा (SAFL) कैम्पस् संस्कृतम् नेटवर्क (CSN) आल्युमिनि असोसियेषन् (SAA) आवासीयसंस्कृतसंभाषणवर्गः इति कार्यक्रमान् आयोजयति। संस्कृतभारतीसहयोगेन अमेरिकादेशे संस्कृतकार्यकर्तृगणं निर्माय देशस्य विविधभागेषु संस्कृतभाषायाः प्रचारं विदधानः अस्ति। गतवर्षे संस्कृतकार्यकर्तृसहायेन 57संस्कृतभाषासंबद्धकार्यक्रमं समायोजयत्। अमेरिकादेशे निवसतः संस्कृभाषायाः प्रचारं कुर्वतः महोदयस्य प्रयत्नः श्लाघ्यः स्तुत्यश्च।



## श्री के.वि. संपत् कुमारः

के.वि. संपत् कुमारमहोदयः श्रीमतीसीतालक्ष्मी-के.एन्. वरदराज-अय्यङ्गारदम्पत्योः द्वितीयपुत्ररूपेण मैसुरुप्रदेशे जन्म प्राप। आधुनिकपद्धत्या बी.काम्, बी.एल्. स्नातकपदवीं समावाप्नोत्। 1988वर्षे मैसूरुनगरे श्रीकान्त एन्टर प्रैसस् नाम्नीं संस्थां संस्थाप्य मैसुरुनगरे सर्वप्रथमं डी.टी.पि. कार्यं समारभत। ततः सुधर्मा-इत्यभिधायाः प्रसिद्धसंस्कृतपत्रिकायाः संपादकरूपेण प्रकाशकरूपेण एकोनत्रिंशद्वर्षेभ्यः कार्यं करोति। न केवलं सुधर्मापत्रिकायाः नैकेषां संस्कृतग्रन्थानां सुधर्मासंस्कृतदिनदर्शिन्याः च प्रकाशनमपि विदधाति। 2010तमे वर्षे संस्कृतपुस्तकप्रदर्शिनीकार्यक्रमः महोदयेन समायोजितः। श्रीवेदान्तदेशिकैः रचितानां ग्रन्थानां प्रचाराय स्थापिताया: श्रीवेङ्कटेशसभायाः कार्यदर्शिरूपेणापि कार्यं निर्वहति। अस्य महोदयस्य संस्कृतसेवां विज्ञाय कर्नाटकसंस्कृपरिषत् माध्यमभीष्मः इति आदर्शसेवासमितिः सेवाधुरीर्णः इति बिरुदेन च सममानयत्। मैसूरुपत्रकारसंघेन अब्दुल-कलाम-प्रशस्त्या सम्मानितः। सर्वदा संस्कृतभाषायाः प्रचारे प्रसारे च बद्धादरः संस्कृताय जीवमानः महोदयः नंनम्यः।

## डॉ. दन्तू मुरलीकृष्णः



डॉ. दन्तू मुरलीकृष्णमहाभागः भारतस्य प्रसिद्धस्य फार्मसिट्कल कम्पनी लुपिन लिमिटेड (LPIN Limited) इत्याख्यस्य वरिष्ठप्रबन्धकरूपेण कार्यं करोति। आन्ध्रप्रदेशराज्यस्य राजमहेन्द्रप्रदेशे जनिं प्रापत्। आन्ध्रप्रदेशविश्वविद्यालयात् स्नातकपदवीं, स्नातकोत्तरपदवीं एम्.एस्.सि. विषये कुरुक्षेत्रविश्वविद्यालयात्, रसायनशास्त्रे विद्यावारिधि (Ph.D.) पदवीं बरकतउल्लाह-विश्वविद्यालयात् च समपीपदत्। वैज्ञानिकः भोपालवास्तव्यः विभिन्नरोगनिरोधकौषधीनाम् अन्वेषणं कुर्वन् वर्तते। वैज्ञानिकक्षेत्रे 35वर्षाणां महान् अनुभवः अस्ति। भगवद्गीतायाः महत्त्वं सामन्यजनानां कृते प्रचाराय संभवामि युगे युगे इति शीर्षकान्वितां सान्द्रमुद्रिकां पुस्तकं च एककोटिपरिमितस्वकीयधनराशिद्वारा संस्कृत-हिन्दी-तेलुगुभाषायां निर्माय प्रकाशितवान्। भगवद्गीतायां विद्यमानाः प्रबन्धनसिद्धान्ताः आध्यात्मिकावधरणविषयाः अस्यां सान्द्रमुद्रिकायां समायोजिताः विद्यन्ते। सान्द्रमुद्रिकायाः पुस्तकस्य च निश्शुल्कवितरणं कुर्वन् अस्ति। महोदयस्य नैके शोधलेखाः देशस्य प्रतिष्ठितासु पत्रिकासु प्रकाशिताः वर्तन्ते। वैज्ञानिकक्षेत्रे सन्नपि संस्कृतभाषायाः भगवद्गीतायाः प्रचाराय कटिबद्धस्य महोदयस्य प्रयत्नः समादणीयः आदर्शः च अस्ति।